विधितच्छेषव्यतिरेकेण भूतञ्चेद्वस्तूपदिशति भव्यार्थत्वेन, कूटस्थनित्यं भूतं नोपदिशतीत्यत्र को हेतुः। न हि भूतमुपदिश्यमानं क्रिया भवति। अक्रियात्वेऽपि भूतस्य क्रियासाधनत्वात् क्रियार्थ एव भूतोपदेश इति चेत्, नैष दोषः क्रियार्थत्वेऽपि क्रियानिर्वर्त्तनशक्तिमद्वस्तूपदिष्टमेव। क्रियार्थन्तु प्रयोजनं तस्य। न चैतावता वस्त्वनुपदिष्टं भवति। यदि नामोपदिष्टं किं तव तेन स्यादिति? उच्यते, अनवगतात्मवस्तूपदेशस्य तथैव भवितुमर्हति, तदवगत्या मिथ्याज्ञानस्य संसारहेतोर्निवृत्तिः प्रयोजनं क्रियत इत्यविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन। अपि च "ब्राह्मणो न हन्तव्यः" इति चैवमाद्या निवृत्तिरुपदिश्यते। न च सा क्रिया नापि क्रियासाधनम्। अक्रियार्थानामुपदेशोऽनर्थकश्चेत् ब्राह्मणो न हन्तव्यः" इत्यादिनिवृत्त्युपदेशानामानर्थक्यं प्राप्तं, तच्चानिष्टम्। न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुं हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण। नञश्चैष स्वभावो यत् स्वसम्बन्धिनोऽभावं बोधयति, अभावबुद्धिश्चौदासीन्यकारणं सा च दग्धेन्धनाग्निवत् स्वयमेवोपशाम्यति, तस्मात् प्रसक्तक्रियाया निवृत्त्यौदासीन्यमेव "ब्राह्मणो न हन्तव्यः" इत्यादिषु प्रतिषेधार्थं मन्यामहे अन्यत्र प्रजापतिव्रतादिभ्यः। तस्मात् पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवाक्यानामानर्थक्याभिधानं द्रष्टव्यम्। यदप्युक्तं कर्त्तव्यविध्यनुप्रवेशमन्तरेण वस्तुमात्रमुच्यमानमनर्थकं स्यात् (सप्तद्वीपा वसुमतीत्यादिवदिति) तत् परिहृतं रज्जुरियं नायं सर्प इति वस्तुमात्रकथनेऽपि प्रयोजनस्य दृष्टत्वात्" भा०। क्रिया अर्थः प्रयोजनं यस्य। २क्रियानिमित्ते त्रि०। "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" पा०।

**क्रियावत्** त्रि० क्रियाऽस्त्यस्य मतुप् मस्य वः। १क्रियाविशिष्टे २क्रियानिरते अमरः "यः क्रियावान् स पण्डितः" चाण०। "त्वं योनिः सर्वभूतानां त्वमाचारः क्रियावताम्" भा० व०३अ०। ३क्रियाश्रये कर्त्तरि च "पश्चात् क्रियावता कर्त्रा योगो भवति कर्म्मणा" हरिः। क्तवतुप्रत्ययान्तशब्दे दृश्यम्।

**क्रियावसन्न** त्रि० क्रियया ऽवसन्नः। साक्ष्यादिप्रमाणेनावसन्ने पराजिते वादिनि प्रतिवादिनि च। "यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत्" इत्युपक्रम्य "स्वयमभ्युपगतोऽपि स्वचर्य्यावसितोऽपि सन्। क्रियावसन्नोऽप्यर्हति परं सभ्यावधारणम्" व्य० त० नारदः। क्रियावसन्नः साक्ष्यादिना प्राप्तपराजयः" रघुनन्दनः।

**क्रियावादिन्** त्रि० क्रियां क्रियासाध्यं वदति वद-णिनि। व्यवहारे साक्ष्यादिप्रमाणरूपक्रियासाध्ययुक्ते वादिनि (फैरादी) मिता०।

**क्रियाविशेषण** न० ६त०। धात्वर्थसाध्यरूपक्रियायाः शाब्दबोधे विशेषणत्वेन भासमाने पदार्थे। शब्दार्थरत्ने विवृतिः "आख्यातं सकारकविशेषणमिति" भाष्योक्तवाक्यलक्षणे विशेषणपदस्य कारकविशेषणक्रियाविशेषणोभयपरतया कारकविशेषणानां क्रियाविशेषणानां कारकभिन्नसम्बोधनादीनां च वाक्यघटकत्वम्। तानि च वाक्यपदीये कतिचित् संगृह्य प्रदर्शितानि यथा "संबोधनान्तं कृत्वोऽर्थाः कारकं प्रथमोवितः। धातुसम्बन्धाधिकारनिष्पन्नमनमस्तनञ्। तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम्। सम्बन्धस्याष्टकस्यास्य क्रिययैवावधार्य्यताम्"। अत्र यद्यपि सम्बोधनस्य सर्व्वत्र प्रकृतक्रियान्वयित्वं न सम्भवति तथापि जानीहीत्यध्याहृतक्रियान्वयितया तस्यास्य प्रकृतक्रियायामन्वयात् परम्परया भवत्येव प्रकृतक्रियान्वयित्वम्। तथाहि "सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः। प्राप्ताभिमुख्यः सम्बोध्यः क्रियासु विनियुज्यते" इति वाक्यपदीये क्रियासु नियोज्यस्यैव संबोध्यतोक्त्या विनियोगविषयक्रियायामेव तस्य साधुत्वात् व्रजानि देवदत्तेत्यादौ तु देवदत्तस्य गमनक्रियायां विनियोगाभावेनाध्याहर्त्तव्यायां जानीहीत्यादिक्रियायामेवान्वयौचित्यात् तत्क्रियायाश्च व्रजानीत्यादिक्रियाया विषयत्वादिसम्बन्धेन विशेषणत्वादेकवाक्यत्वम्। अन्यथा व्रजानि देवदत्तेत्यनयोरुभयवाक्यघटकत्वे तयोश्च परस्परमन्वयेनैकवाक्यत्वाभावेन समानवाक्यमात्रविषयनिघातानुपपत्तेः। तथाहि पदादित्यधिकृत्य सर्व्वमनुदात्तमपदादाविति" चोपक्रम्य आमन्त्रितस्य चेति" सूत्रेण अष्टमाध्याये पदादुत्तरवर्त्तिनो ऽपादादिस्थितस्यामन्त्रितस्य षष्ठाध्यायविहितादुदात्तत्वं निहत्य सर्व्वानुदात्तत्वं विहितं वार्त्तिककारेण च "समानवाक्ये निघातयुष्मदस्मदादेशाः" इत्यनेन आद्युदात्तत्वनिघातः एकवाक्यएव व्यवस्थापितोऽतः व्रजानि देवदत्तेत्यनयोरुक्तरीत्यैकवाक्यत्वएव निघातो नान्यथेति। उक्तञ्च वाक्यपदीये "संबोधनपदं यच्च तत् क्रियाया विशेषणम्। व्रजानि देवदत्तेति निघातोऽत्र